# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद ॥



### ॥ नवमः सर्गः ॥(मुग्धमुकुन्दः)

(हरिणी)

अथ तां(म्) मन्मथखिन्नां(म्) रतिरसभिन्नां(वँ) विषादसम्पन्नाम्
अनुचिन्तितहरिचरितां(ङ्) कलहान्तरितामुवाच रहसि सखी ॥ 1॥

### ॥ गीतम् 18 ॥

(अथ अष्टादशप्रबन्धो गुर्जरीरागेण रूपकताले गीयते)

हरिरभिसरति वहति मधुपवने ।
किमपरमधिकसुखं(म्) सखि भुवने ॥
माधवे मा कुरु मानिनि मानमये ॥ 1॥

तालफलादपि गुरुमतिसरसम् ।
किं(वँ) विफलीकुरुषे कुचकलशम् ॥ 2॥ माधवे

कति न कथितमिदमनुपदमचिरम् ।
मा परिहर हरिमतिशयरुचिरम् ॥ 3॥ माधवे

किमिति विषीदसि रोदिषि विकला ।
विहसति युवतिसभा तव सकला ॥ 4॥ माधवे

मृदुनलिनीदलशीतलशयने ।
हरिमवलोकय सफलय नयने ॥ 5॥ माधवे

जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् ॥ 6॥ माधवे

हरिरुपयातु वदतु बहुमधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ॥ 7॥ माधवे

श्रीजयदेवभणितमतिललितम् ।
सुखयतु रसिकजनं(म्) हरिचरितम् ॥ 8॥ माधवे

(शार्दूलविक्रीडितेन)

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां(यँ) यातासि तस्मिन्प्रिये ।
तद्युक्तं(वँ) विपरीतकारिणि तव श्रीखण्डचर्चा विषं(म्)
शीतां(म्)शुस्तपनो हिमं(म्) हुतवहः(ख्) क्रीडामुदो यातनाः ॥ 1॥

(शार्दूलविक्रीडितेन)

अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविभ्रंशनः(स्),
स्तम्भाकर्षणदृष्टिहर्षणमहामन्त्रः(ख्) कुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां ,
भ्रंशः(ख्) कंसरिपोर्व्यपोहयतु वः(श्) श्रेयांसि वंशीरवः ॥2॥

इति श्रीगीतगोविन्दे कलहान्तरितावर्णने मुग्धमुकुन्दो नाम नवमः सर्गः

